## अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । (७५/३२२)

अस्थि दधि सक्थि अक्षि इत्येतेषां नपुंसकानां तृतीयादिषु अजादिषु विभक्तिषु [1]परतोऽनङ इत्ययमादेशो भवति, स चोदात्तो भवति । अस्थ्ना । अस्थ्ने । दध्ना । दध्ने । सक्थ्ना । सक्थ्ने । अक्ष्णा । अक्ष्णे । अस्थ्यादय[2] आद्युदात्ताः, तेषामनङादेशः स्थानिवद्भावादनुदात्तः स्यात् इति उदात्तवचनम् । तत्र भसञ्ज्ञायामल्लोपे कृते उदात्तनिवृत्तिस्वरेण विभक्तिरुदात्ता भवति । एतैरस्थ्यादिभिर्नपुंसकैरनपुंसकस्यापि [3]अङ्गस्य तदन्तग्रहणमिष्यते । प्रियास्थ्ना [4]ब्राह्मणेन । प्रियदध्ना[5] । तृतीयादिषु इति किम् ?अस्थिनी । दधिनी । अचि इत्येव, अस्थिभ्याम् । दधिभ्याम् ॥

## छन्दस्यपि दृश्यते । (७६/३८७८)

अस्थिदधिसक्थ्यक्ष्णाम् अनङ छन्दस्यपि दृश्यते । [6]यत्र विहितस्ततोऽन्यत्रापि दृश्यते । अचि इत्युक्तम्, [7]अनजादौ अपि दृश्यते । 'इन्द्रो दधीचो अस्थभिः' (ऋ. १.८४.१३) । 'भद्रं पश्येमाक्षभिः' (वा.सं. २५.२१)। तृतीयादिषु इत्युक्तम्, अतृतीयादिषु अपि दृश्यते । अस्थान्युत्कृत्य जुहोति । विभक्तौ इत्युक्तम्, अविभक्तावपि दृश्यते । अक्षण्वता लाङ्गलेन । 'अस्थन्वन्तं यदनस्था बिभर्ति' (ऋ. १.१६४.४) ॥

## ई च द्विवचने । (७७/३८७९)

द्विवचने परतः छन्दसि विषये अस्थ्यादीनाम् ईकारादेशो भवति, स च उदात्तः । अक्षी ते इन्द्र पिङ्गले [8]कपेरिव । 'अक्षीभ्यां ते नासिकाभ्याम्' (ऋ. १०. १६३. १) । अक्षी इत्यत्र नुम् परत्वादीकारेण बाध्यते । तेन कृते 'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव' (व्या. प. ४०) इति पुनर् नुम् न [9]क्रियते ॥

## नाभ्यस्ताच्छतुः । (७८/४२७)

अभ्यस्तादङ्गादुत्तरस्य शतुः नुम् न भवति । ददत्, ददतौ, ददतः । दधत्, दधतौ, दधतः । जक्षत्, जक्षतौ, जक्षतः । जाग्रत्, जाग्रतौ, जाग्रतः । शतुरनन्तर [10]ईकारो न विहितः इति व्यवहितस्यापि [11]नुमः प्रतिषेधो विज्ञायते ॥

## वा नपुंसकस्य । (७९/४४४)

अभ्यस्तादङ्गादुत्तरो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य [12]वा नुमागमो[13] भवति । ददति, ददन्ति कुलानि । दधति, दधन्ति कुलानि । जक्षति, जक्षन्ति कुलानि । जाग्रति, जाग्रन्ति कुलानि ॥

---

1. परतः नास्ति इ. ई. 2. शब्दाः इत्यधिकम् इ. ई. 3. अङ्गस्य नास्ति क. इ. 4. ब्राह्मणकुलेन क. 5. प्रियदध्ने इत्यधिकम् ई. 6. यतः ई, हि इत्यधिकम् इ. 7. अनच्यपि क. ब. ड. इ. ई. ह. 8. कपेरिव नास्ति क, अक्षी ते ते युधि विहते कपेरिव इ. 9. भवति क. 10. ईकारो नास्ति क. 11. नुमः नास्ति इ. 12. वा नास्ति ड. 13. न इत्यधिकम् ड.